ओं

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुस्साक्षात् परं ब्रह्म तस्मै श्री गुरवे नमः।।
श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम्।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ।।

**अथ सङ्कल्पः**

भगवतः सप्तगिरीशस्य, पद्मावतीसमेतस्य श्रीवेङ्कटेश्वरस्वामिनः कृपया अधुना सर्वत्र जगति प्रसरतः जनानां प्राणापायकरस्य करोना नामकस्य रोगविशेषस्य निवारणार्थं, सर्वेषां शीघ्रमेव सुस्थिरारोग्यसिद्ध्यर्थं, अपि च एतद्व्याधि प्रभावेण प्रपञ्चे सञ्जात सञ्जनिष्यमाण सकल सामाजिक आर्थिकसमस्यानिवृत्ति द्वारा, सकल सम्पदभिवृद्ध्यर्थं, अस्मिन् सङ्कट समये करोना व्याधिविनाशनार्थं विविधरूपेण समाजसेवां कुर्वतां सर्वेषाम् अधिकारिणां, स्वयं सेवकानां, पण्डितानां, अर्चकानां, पुरोहितानां, पौराणां च सर्वतोभद्ररक्षासिद्ध्यर्थं, अस्मिन् सन्दर्भे उपयुज्यमानानां ओषधीनां वीर्यवत्तासिद्ध्यर्थं, एवमेव करोना व्याधि निर्मूलनविषये सर्वेषां नागरिकाणां, समुचित सामाजिकस्पृहा सिद्धि द्वारा अतिशीघ्रमेव करोना व्याधि निर्मूलनार्थं, सर्वविधक्रिमिपरम्पराणां मूलभूतस्य विषूचिका महामारी क्रिमेः विनाशनार्थं, सर्वविधदृष्टादृष्टसूक्ष्मक्रिमिप्रतिनिधिभूतविषूचिकाक्रिमिनिवारकस्य सृष्ट्यादौ ब्रह्मदेवेन उपदिष्टस्य श्रीमद्योगवासिष्ठे वाल्मीकीये उत्पत्तिप्रकरणान्तर्गतस्य विषूचिका महामारी निवारकस्य महामन्त्रस्य पारायणं, तथा श्री शृङ्गेरी जगद्गुरु विरचित श्री दुर्गापरमेश्वरी स्तोत्र पारायणं, श्री धन्वन्तरी महामन्त्रपारायणं च अन्योन्य साहाय्येन यथाशक्ति करिष्ये।

**अथ श्री वासिष्ठ महारामायणे वाल्मीकीये उत्पत्तिप्रकरणे एकोन सप्ततितमस्सर्गः**

**श्री वसिष्ठ उवाच –**

अथ वर्षसहस्रेण तां पितामह आययौ ।
दारुणं हि तप: सिद्ध्यै विषाग्निरपि शीतल: ॥1॥
मनसैव प्रणम्यैनं सा तथैव स्थिता सती ।
को वर: क्षुच्छमायालम् इति चिन्तान्विताऽभवत् ॥2॥
आस्मृतं प्रार्थयिष्येऽहं वरमेकमिमं विभुम् ।
अनायसी चायसी च स्यामहं जीवसूचिका ॥3॥
अस्योक्त्या द्विविधा सूचिः भूत्वाऽलक्ष्या विशाम्यहम् ।
प्राणिनां सह सर्वेषां हृदयं सुरभिर्यथा ॥4॥
यथाभिमतमेतेन ग्रसेयं सकलं जगत् ।

क्रमेण क्षुद्विनाशाय क्षुद्विनाशः परं सुखम् ॥5॥
इति संचिन्तयन्तीं ताम् उवाच कमलालयः ।
अन्यादृश्याः तथा दृष्ट्वा स्तनिताभ्ररवोपमम् ॥6॥

**ब्रह्मोवाच –**

पुत्रि कर्कटिके रक्षः कुलशैलाभ्रमालिके ।
उत्तिष्ठ त्वं तु तुष्टोऽस्मि गृहाणाभिमतं वरम् ॥7॥

**कर्कट्युवाच –**

भगवन् भूतभव्येश स्यामहं जीवसूचिका।
अनायसी चायसी च विधेर्पयसि चेद्वरम् ॥8॥

**श्रीवसिष्ठ उवाच –**

एवमस्त्विति तामुक्त्वा पुनराह पितामहः ।
सूचिका सोपसर्गा त्वं भविष्यसि विषूचिका ॥9॥
सूक्ष्मया मायया सर्वलोकहिंसां करिष्यसि।
दुर्भोजना दुरारम्भा मूर्खा दुःस्थितयश्च ये ॥10॥
दुर्देशवासिनो दुष्टाः तेषां हिंसां करिष्यसि।
प्रविश्याऽऽहृदयं प्राणैः पद्मप्लीहादिबाधनात् ॥11॥
वातलेखात्मिका व्याधिः भविष्यसि विषूचिका ।
सगुणं विगुणं चैव जनमासादयिष्यसि ॥12॥
गुणान्वितचिकित्सार्थं मन्त्रोऽयं तु मयोच्यते ।

**ब्रह्मोवाच –**

हिमाद्रेरुत्तरे पार्श्वे कर्कटी नाम राक्षसी ॥13॥
विषूचिकाभिधाना सा नाम्नाप्यन्यायबाधिका।
तस्याः मन्त्रः

ओं ह्रीं ह्रां रीं रां विष्णुशक्तये नमः ।

ओं नमो भगवति विष्णुशक्तिम् एनाम् ओं हर हर, नय नय, पच पच, मथ मथ, उत्सादय उत्सादय, दूरे कुरु स्वाहा। हिमवन्तं गच्छ, जीवः सः सः सः चन्द्रमण्डलगतोऽसि स्वाहा।

इति मन्त्री महामन्त्रं न्यस्य वामकरोदरे ।
मार्जयेदातुराकारं तेन हस्तेन संयुतः ॥14॥
हिमशैलाभिमुख्येन विद्रुतां तां विचिन्तयेत् ।
कर्कटी कर्कशाक्रन्दां मन्त्रमुद्गरमर्दिताम् ॥15॥

आतुरं चिन्तयेच्चन्द्रे रसायनहृदि स्थितम् ।
अजरामरणं युक्तं मुक्तं सर्वाधिविभ्रमैः ॥16॥
साधको हि शुचिर्भूत्वा स्वाचान्तः सुसमाहितः ।
क्रमेणानेन सकलां प्रोच्छिनत्ति विशूचिकाम् ॥17॥
इति गगनगतः त्रिलोकनाथः गगनगसिद्धगृहीतसिद्धमन्त्रः।
गतः उपगतशक्रवन्द्यमानः निजपुरमक्षयमायमुज्ज्वलश्रीः ॥18॥

**।। इत्यार्षे श्रीवासिष्ठरामायणे वाल्मीकीये उत्पत्तिप्रकरणे विषूचिकामन्त्रकथनं नाम एकोनसप्ततितमस्सर्गः।।**

## अथ श्री दुर्गापरमेश्वरीस्तोत्रपारायणम्

एतावन्तं समयं सर्वापद्भ्योऽपि रक्षणं कृत्वा
देशस्य परमिदानीं ताटस्थ्यं केन वहसि दुर्गाम्बा ।। 1 ।।
अपराधा बहुशः खलु पुत्राणां प्रतिपदं भवन्त्येव।
को वा सहते लोके सर्वांस्तान् मातरं विहायैकाम् ।। 2 ।।
मा भज मा भज दुर्गे ताटस्थ्यं पुत्रकेषि दीनेषु।
के वा गृह्णन्ति सुतान् मात्रा त्यक्तान् वदाम्बिके लोके।। 3 ।।
इतः परं वा जगदम्ब जातु देशस्य रोगप्रमुखापदोऽस्य।
नस्स्युस्तथा कुर्वचलां कृपामित्यभ्यर्थनां मे सफली कुरुष्व।। 4 ।।
पापहीनजनतावनदक्षाः सन्ति निर्जरवरा न कियन्तः।
पापपूर्णजनरक्षणदक्षां त्वां विना भुवि परां न लोके।। 5 ।।

## अथ धन्वन्तरी ध्यानम्

अच्युतानन्तगोविन्त विष्णो नारायणामृत।
रोगान्मे नाशयाशेषान् आशु धन्वन्तरे हरे ।। 1 ।।
आरोग्यं दीर्घमायुष्यं बलं तेजो धियं श्रियम्।
स्वभक्तेभ्यः अनुगृह्णन्तं वन्दे धन्वन्तरिं हरिम्।। 2 ।।
धन्वन्तरेरिदं श्लोकं भक्त्या नित्यं पठन्ति ये।
अनारोग्यं न तेषां स्यात् सुखं जीवन्ति ते चिरम्।। 3 ।।

ओं नमो भगवते वासुदेवाय धन्वन्तरये अमृतकलशहस्ताय वज्रजलौकहस्ताय सर्वामयविनाशनाय त्रैलोक्यनाथाय महाविष्णवे स्वाहा।

ओं वासुदेवाय विद्महे सुधाहस्ताय धीमहि
तन्नो धन्वन्तरिः प्रचोदयात्।।

श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम्।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ।।

***